CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S. D. P. B.

Coll. No. 495

Title Vedānta sāra

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 495 Subject: Vedānt

Title: Vedāntasāra

Author: Sadānanda Scribe: Umāśankara

Date of the work: — Date of the Ms.: V.S. १८५९

Place of the work: — Place of the Ms.: —

Size: 8.5" by 4.8" Extent: 25 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: —

॥वेदांतसारपत्रं॥१॥

वे॰सा॰ ॥श्रीगणेशायनमः॥ ॥ॐपरमात्मनेनमः॥ ॥अखंडंसच्चि
१ दानंदमवाङ्मनसगोचरं॥आत्मानमखिलाधारमाश्रयेऽभी
ष्टसिद्धये॥१॥अर्थतोप्यद्वयानंदानतीतद्वैतभावतः॥गुरूना न३
राध्यवेदांतसारंवक्ष्येयथामति॥२॥वेदांतोनामोपनिषत्प्र
माणंतदुपकारीणिशारीरकसूत्रादीनिच॥अस्यवेदांतप्रक
रणत्वात्तदीयैरेवानुबंधैस्तद्वत्तासिद्धेर्नतेपृथगालोचनीया
ः॥तत्रानुबंधोनाम॥अधिकारिविषयसंबंधप्रयोजनानि॥
अधिकारीतुविधिवदधीतवेदवेदांगत्वेनापाततोऽधिगता १
खिलवेदार्थोऽस्मिन्जन्मनिजन्मांतरेवाकाम्यनिषिद्धवर्ज

नपुरःसरंनित्यनैमित्तिकप्रायश्चित्तोपासनाऽनुष्ठानेननिर्गत
निखिलकल्मषतयानितांतनिर्मलस्वांतःसाधनचतुष्टयसंप
न्नःप्रमाता॥काम्यानिस्वर्गादीष्टसाधनानिज्योतिष्टोमादीनि
॥निषिद्धानिनरकाद्यनिष्टसाधनानिज्योतिष्टोमादीनि॥नि
षिद्धानिनरकाद्यनिष्टसाधनानिज्योतिष्टोमाब्राह्मणहनना
दीनि॥नित्यान्यकरणेप्रत्यवायसाधनानिसंध्यावंदनादीनि
॥नैमित्तिकानिपुत्रजन्माद्यनुबंधीनिजातेष्ट्यादीनि॥प्राय
श्चित्तानिपापक्षयसाधनानिचांद्रायणादीनि॥उपास
नानिसगुणब्रह्मविषयमानसव्यापाररूपाणिशांडिल्यवि

वे॰सा॰
२
३.दत्ते

यादीनि च॥ एषां नित्यादीनां बुद्धिशुद्धिः परं प्रयोजनं॥ उपास
नानां तु चित्तैकाग्र्यं प्रयोजनं॥ तमेतमात्मानं ब्राह्मणा वेदा
नुवचनेन विविदिषंति यज्ञेनेत्यादिश्रुतेः॥ तपसा कल्मषं
हंतीत्यादिस्मृतेश्च॥ नित्यनैमित्तिकयोरुपासनानां चावां
तरफलं पितृलोकसत्यलोकप्राप्तिः॥ कर्मणा पितृलोको वि
द्यया देवलोक इति श्रुतेः॥ साधनानि नित्यानित्यवस्तुविवे
केहामुत्रार्थफलभोगविरागशमदमादिषट्कसंपत्तिमुमुक्षुत्वा
नि॥ नित्यानित्यवस्तुविवेकस्तावद्ब्रह्मैव नित्यं वस्तु॥ ततो
ऽन्यदखिलमनित्यमिति विवेचनं॥ ऐहिकानां स्रक्चंदना २

दिविषयभोगानां कर्मजन्यतयाऽनित्यत्वादामुष्मिकाणामप्य
मृतादिविषयभोगानामनित्यतया तेभ्यो नितरां विरतिरिहा
श्री मुत्रार्थफलभोगविरागः॥ शमादयः षट्॥ शमदमोपरतितिति
क्षासमाधानश्रद्धाख्याः॥ शमस्तावच्छ्रवणादिव्यतिरिक्तविष
येभ्यो मनसो निग्रहः॥ दमो बाह्येंद्रियाणां तद्व्यतिरिक्तविष
येभ्यो निवर्त्तनं॥ निवर्त्तितानां तेषां तद्व्यतिरिक्तविषयेभ्य उ
परमणमुपरतिः॥ अथवा विहितानां कर्मणां विधिना परि
त्यागः॥ तितिक्षा शीतोष्णादिद्वंद्वसहिष्णुता॥ निगृहीतस्य म
नसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानं॥

गुरुवेदांतवाक्येषु विश्वासः श्रद्धा॥ मुमुक्षुत्वं मोक्षेच्छावत्वं॥
एवंभूतः प्रमाताऽधिकारी॥ शांतो दांत इति श्रुतेः॥ उक्तं च॥ प्र
शांतचित्ताय जितेंद्रियाय च प्रहीणदोषाय यथोक्तकारिणे॥ गु
णान्विताया नुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे॥ इति॥
विषयो जीवब्रह्मैक्यं॥ शुद्धचैतन्यं प्रमेयं॥ तत्रैव वेदांतानां ता
त्पर्यात्॥ संबंधस्तु तदैक्यप्रमेयस्यताऽज्ञाननिवृत्तिः स्वस्वरू
पानंदावाप्तिश्च॥ तरति शोकमात्मविद्ब्रह्मविद्ब्रह्मैव भवती॥
त्यादिश्रुतेः॥ अयमधिकारी जननमरणादिसंसारानलसं
तप्तो दीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं
तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावलक्षणः॥ प्रयोजनं च तदैक्यप्र
मेयगता ४

गुरुमुपसृत्य तमनुसरति॥ समित्पाणिः श्रोत्रियमित्यादिश्रुते
ः॥ स परमकृपयाऽध्यारोपापवादन्यायेनैनमुपदिशति॥ तस्मै
स विद्वानुपसन्नाय प्राहेत्यादिश्रुतेः॥ असर्पभूतरज्वां सर्पा
रोपवत्॥ वस्तुन्यवस्त्वारोपोऽध्यारोपः॥ वस्तु सच्चिदानंदान
ताद्वयं ब्रह्म॥ अज्ञानादिसकलजडसमूहोऽवस्तु॥ अज्ञानं तु
सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं य
त्किंचिदिति हि वदंति॥ अहमज्ञ इत्यनुभवात्॥ देवात्मशक्तिं
स्वगुणैर्निगूढामित्यादिश्रुतेश्च॥ इदमज्ञानं समष्टिव्यष्ट्यभि
प्रायेणैकमनेकमिति च व्यवह्रियते॥ तथाहि॥ यथा वृक्षा

नाम

णां समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशः॥ यथा वा जला
नां समष्ट्यभिप्रायेण जलाशय इति॥ तथा नानात्वेन प्रतिभास
मानानां जीवगताज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशः॥
अजामेकामित्यादिश्रुतेः॥ इयं समष्टिरुत्कृष्टोपाधितया विशु
द्धसत्वप्रधाना॥ एतदुपहितं चैतन्यं सर्वज्ञत्वसर्वेश्वरत्वसर्वनि
यंतृत्वादिगुणकं सदव्यक्तमंतर्यामी जगत्कारणमीश्वर इ
ति च व्यपदिश्यते॥ सकलाज्ञानावभासकत्वात्॥ यः सर्वज्ञः
सर्वविदित्यादिश्रुतेः॥ ईश्वरस्येयं समष्टिरखिलकारणत्वात्कार
णशरीरमानंदप्रचुरत्वात्कोशवदाछादकत्वाच्चानंदमयको

शः॥ सर्वोपरमत्वात्सुषुप्तिः॥ अत एव स्थूलसूक्ष्मप्रपंचलय
स्थानमिति चोच्यते॥ यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यने
कत्वव्यपदेशः॥ यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण जलानीति
॥ तथाऽज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः॥ इंद्रो मा
याभिः पुरुरूप ईयत इत्यादिश्रुतेः॥ अत्र व्यस्तसमस्तव्यापि
त्वेन व्यष्टिसमष्टिताव्यपदेशः॥ इयं व्यष्टिर्निकृष्टोपाधितया म
लिनसत्वप्रधाना॥ एतदुपहितं चैतन्यं अल्पज्ञत्वानीश्वरत्वा
दिगुणकं प्राज्ञ इत्युच्यते॥ एकाज्ञानावभासकत्वात्॥ अस्य
प्राज्ञत्वमस्पष्टोपाधितयाऽनतिप्रकाशत्वात्॥ अस्यापीयम

वे॰ सा॰ ५

हंकारादिकारणत्वात्कारणशरीरमानंदप्रचुरत्वात्कोशवदाछा
दकत्वाच्चैतदानंदमयः कोशः॥ सर्वोपरमत्वात्सुषुप्तिः॥
अत एव स्थूलसूक्ष्मशरीरलयस्थानमिति चोच्यते॥ तदानी
मेतावीश्वरप्राज्ञौ चैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरानंदमनुभव
तः॥ आनंदभुक् चेतोमुखः प्राज्ञ इत्यादिश्रुतेः॥ सुखमहम
स्वाप्सं न किंचिदवेदिषमिति उच्छितस्यपरामर्शोपपत्तेश्च॥
अनयोः समष्टिव्यष्ट्योर्वनवृक्षयोरिव जलाशयजलयोरिवा ५
चाभेदः॥ एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावछिन्ना
काशयोरिव जलाशयजलगतप्रतिबिंबाकाशयोरिवाचाभे

दः॥ एषः सर्वेश्वर इत्यादिश्रुतेः॥ वनवृक्षतदवछिन्नाकाशयो
र्जलाशयजलतद्गतप्रतिबिंबाकाशयोर्वा आधारानुपहिता
काशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुप
हितं चैतन्यं तत्तुरीयमित्युच्यते॥ शिवं शांतमद्वैतं चतुर्थं मन्यं
त इत्यादिश्रुतेः॥ इदमेव तुरीयं शुद्धचैतन्यमज्ञानादितदुपहि
तचैतन्याभ्यां तप्तायःपिंडवदविविक्तं सन्महावाक्यस्य वाच्यं
विविक्तं सल्लक्ष्यमिति चोच्यते॥ अस्याज्ञानस्यावरणविक्षेप
नामकमस्ति शक्तिद्वयं॥ आवरणशक्तिस्तावदल्पोपि मेघोऽ
नेकयोजनमायतमादित्यमंडलमवलोकयितृनयन[illegible]पि[illegible]

सा ८ धा धा

यथा

वे॰सा॰ ६

धायकतयायथाछादयतीव॥तथाऽज्ञानंपरिछिन्नमपिआत्मा
नमपरिछिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकतयाछा
दयतीव॥तादृशंसामर्थ्यं॥तदुक्तं॥घनछन्नदृष्टिर्घनछन्नमर्कं
यथामन्यतेनिःप्रभंचातिमूढः॥तथाबद्धवद्भातियोमूढदृष्टेः
सनित्योपलब्धिःस्वरूपोहमात्मेति॥१॥अनयावृतस्यात्मनः
कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिसंसारसंभावनाऽपिसं
भवति॥यथास्वा ज्ञानेनावृतायांरज्जौसर्पत्वसंभावना॥वि
क्षेपशक्तिस्तुयथारज्ज्वज्ञानंस्वावृतरज्जौस्वशक्त्यासर्पादिक ६
मुद्भावयति॥एवमज्ञानमपिस्वावृतात्म[redacted]शक्त्याकाशादि श्री१

१ न्वतयाविक्षेप

प्रपंचमुद्भावयतितादृशंसामर्थ्यं॥तदुक्तं॥विक्षेपशक्तिर्लिंगा
दिब्रह्मांडांतंजगत्सृजेदिति॥शक्तिद्वयवदज्ञानोपहितंचैतन्यं त
स्वप्रधानतयानिमित्तं॥स्वोपाधिप्रधानतयोपादानंचभव
ति॥यथालूता॥तंतुःस्वकार्यंप्रतिस्वप्रधानतयानिमित्तं॥स्व
शरीरप्रधानतयोपादानंचभवति॥तमःप्रधानविक्षेपशक्ति
मदज्ञानोपहितचैतन्यादाकाशः॥आकाशाद्वायुर्वायोरग्नि
रग्नेरापोऽद्भ्यःपृथिवीचोत्पद्यते॥एतस्मादात्मनःआकाशः
संभूतइत्यादिश्रुतेः॥तेषुजाड्याधिक्यदर्शनात्तमःप्राधा
न्यंतत्कारणस्यइदानींसत्वरजस्तमांसिकारणगुणप्रक्रमेण

वे॰सा॰
८

तेषाकाशादिषूत्पद्यंते॥ एतान्येव सूक्ष्मभूतानि तन्मात्राण्य
पंचीकृतानि चोच्यंते॥ एतेभ्यः सूक्ष्मशरीराणि स्थूलभूता
नि चोत्पद्यंते॥ सूक्ष्मशरीराणि सप्तदशावयवानि लिंगशरी
राणि ~~सप्तदशावयवानिलिंगशरीराणि~~॥ अवयवास्तु ज्ञानें
द्रियपंचकं। बुद्धिमनसी॥ कर्मेंद्रियपंचकं वायुपंचकं चेति
॥ ज्ञानेंद्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि॥ एतानि
पुनराकाशादीनां सात्विकांशेभ्यो व्यस्तेभ्यः पृथक्पृथक्क्र
मेणोत्पद्यंते॥ बुद्धिर्नाम निश्चयांतःकरणवृत्तिः॥ मनो नाम ८ त्मिकां
संकल्पविकल्पात्मिकांतःकरणवृत्तिः॥ अनयोरेव चित्ताहं

कारयोरंतर्भावः॥ एते पुनराकाशादिगतसात्विकांशेभ्यो मिलि
तेभ्य उत्पद्यंते॥ एतेषां प्रकाशात्मकत्वात्सात्विकांशकार्यत्वं॥
इयं बुद्धिः ज्ञानेंद्रियैः सहिता सती विज्ञानमयकोशो भवति॥
अयं कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानित्वेनेहलो
कपरंलोकगामी व्यावहारिको जीव इत्युच्यते॥ मनस्तु कर्मेंद्रि
यैः सहितं सत्मनोमयकोशो भवति॥ कर्मेंद्रियाणि वाक्पा
णिपादपायूपस्थाख्यानि॥ एतानि पुनराकाशादीनां रजोंशे
भ्यो व्यस्तेभ्यः पृथक्क्रमेणोत्पद्यंते॥ वायवः॥ प्राणाऽपानव्या
नोदानसमानाः॥ प्राणो नाम प्राग्गमनवान्नासाग्रस्थानवर्त्ती

॥अपानोनामाधोगमनवान्पाय्वादिस्थानवर्त्ती॥व्यानोना
मविष्वग्गमनवानिखिलशरीरवर्त्ती॥उदानःकंठस्थानीयऊ
र्द्ध्वगमनवानुत्क्रमणवायुः॥समानःशरीरमध्यगोऽशितपी
तान्नादिसमीकरणकरः॥केचित्तुनागकूर्मककलदेवदत्त
धनंजयाख्याःपंचान्यवायवःसंतीतिवदंति॥नागउद्गीरण
करः॥कूर्मउन्मीलनकरः॥ककलःक्षुधाकरः॥देवदत्तोजृं
भणः॥धनंजयःपोषणकरः॥एतेषांप्राणादिष्वंतर्भावात्प्रा
णादयःपंचैवेतिकेचित्॥एतत्प्राणादिपंचकंआकाशादि
गतरजोंशेभ्योमिलितेभ्यउत्पद्यते॥इदंप्राणादिपंचकंकर्मे
तत्राप्ययंक्रमः॥आकाशाच्छ्रोत्रपादौवायोस्त्वक्पाणीतेजसश्चक्षुर्वागिंद्रियेजलाज्जिह्वोपस्थौपृ
थिव्याघ्राणपाय्विंद्रिये॥

ंद्रियैःसहितंसत्प्राणमयःकोशोभवति॥अस्यक्रियात्मकत्वे
नरजोंशकार्यत्वं॥एतेषुकोशेषुमध्येविज्ञानमयोज्ञानशक्ति
मान्कर्त्तृरूपः॥मनोमयइच्छाशक्तिमान्करणरूपः॥प्राण
मयःक्रियाशक्तिमान्कार्यरूपः॥योग्यत्वादेवमेतेषांविभा
गइतिवर्णयंति॥एतत्कोशत्रयंमिलितंसूक्ष्मशरीरमित्युच्य
ते॥अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतयावनवज्जला व
शयवद्वासमष्टिः॥अनेकबुद्धिविषयतयावृक्षवज्जलवद्वा
व्यष्टिरितिचभवति॥एतत्समष्ट्युपहितंचैतन्यंसूत्रात्माहि
रण्यगर्भःप्राणइतिचोच्यते॥सर्वत्रानुस्यूतत्वात्॥ज्ञानेक्रिया छ

वे॰सा॰ ८

पंचीकृतपंचमहाभूतानिमानिवाच्च॥२

शक्तिमदुपहितत्वाच्च॥ अस्यैषा समष्टिः स्थूलशरीरापेक्षया
सूक्ष्मत्वात्सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं॥ जाग्रद्वास
नामयत्वात्स्वप्नः॥ अतएव स्थूलशरीरलयस्थानमितिचो
च्यते॥ एतौ सूत्रात्मतैजसाविदानीं मनोवृत्तिभिः सूक्ष्मविषया
ननुभवतः॥ प्रविविक्तभुक्तैजसः॥ इत्यादिश्रुतेः॥ अत्रापि
व्यष्टिसमष्ट्योस्तदुपहितसूत्रात्मतैजसयोश्च वनवृक्षवत्त
दवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिंबाकाश
वच्चाभेदः॥ एवं सूक्ष्मशरीरोत्पत्तिः॥ स्थूलभूतानि पंचीकृ
तानि॥ पंचीकरणं तु॥ आकाशादिपंचस्वेकैकं द्विधासमं

व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वा ~~[illegible]~~ दिहेतोरे
व सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात् स्वप्नः स्थूलशरीरलय

एतत् ... द्यं सूपहितचैतन्यं तैजसो भवति तैजसो
... येन सूक्ष्मशरीरणोपहितत्वात्॥ अस्यापीयं

प्रपंचा

४

तदुक्तं॥ द्वेधा विधाय चैकैकं चतुर्धा प्रथमं पुनः॥ स्वस्वेतरद्वितीयांशैर्योजना
त्पंच पंच ते॥३
विभज्य तेषु दशसु भागेषु प्राथमिकपंचभागान्प्रत्येकं चतुर्धास
मं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयभागपरित्यागेन भा
गांतरेषु योजनं॥ अस्याऽप्रामाण्यं नाशंकनीयं॥ त्रिवृत्करणमि
तिश्रुतेः॥ पंचीकरणस्याप्युपलक्षणत्वात्॥ पंचानां पंचात्म
कत्वे समानेपि वैशेष्यात्तु तद्वादस्तद्वाद इति न्यायेनाकाशादिव्यपदे
शः संभवति॥ तदानीमाकाशे शब्दोऽभिव्यज्यते॥ वायौ शब्दस्पर्शौ
॥ अग्नौ शब्दस्पर्शरूपाणि॥ अप्सु शब्दस्पर्शरूपरसाः॥ पृथिव्यां
शब्दस्पर्शरूपाणि रसगंधाश्च॥ एतेभ्यः पंचीकृतेभ्यो भूर्भुवः
स्वर्महः जनस्तपः सत्यमित्येतन्नामकानामुपर्युपरि विद्यमाना

इती॥

तु

५

वे·सा·
१०

नामतलपातालवितलसुतलरसातलतलातलमहातलना
मकानामधोधोविद्यमानानांलोकानांब्रह्मांडस्यचतुर्विधस्थू
लशरीराणांअन्नपानादीनांचोत्पत्तिर्भवति॥शरीराणिजरायु
जांडजस्वेदजोद्भिज्जाख्यानि॥जरायुजानिजरायुभ्योजातानि
मनुष्यपश्वादीनि॥अंडजानिअंडेभ्योजातानिपक्षिपन्नगादी
नि॥स्वेदजानिस्वेदाज्जातानियूकामशकादीनि॥उद्भिज्जानि
भूमिमुद्भिद्यजातानिकक्षवृक्षादीनि॥अत्रापिचतुर्विध
स्थूलशरीरमेकानेकबुद्धिविषयतयावनवज्जलाशयव १०
द्वासमष्टिःवृक्षवज्जलवद्वाव्यष्टिरपिभवति॥एतत्समष्ट्युप

हितंचैतन्यंवैश्वानरोविराडितिचोच्यतेसर्वनराभिमानित्वा
त्॥विविधंराजमानत्वाच्च॥अस्यैषासमष्टिःस्थूलशरीरं॥
अन्नविकारत्वादन्नमयःकोशःस्थूलभोगायतनत्वाच्चस्थू
लशरीरंजाग्रदितिव्यपदिश्यते॥एतद्व्यष्ट्युपहितंचैतन्यंवि
श्वइत्युच्यते॥स्थूलशरीरमपरित्यज्यसूक्ष्मशरीरादिप्रवे
ष्टत्वात्॥अस्याप्येषास्थूलशरीरं॥अन्नविकारादितिहेतो
रन्नमयकोशोजाग्रदितिचोच्यते॥तदानीमेतौविश्ववैश्वा
नरौदिग्वातार्कवरुणाश्विभिःक्रमान्नियंत्रितेनश्रोत्रादींद्रि
यपंचकेनक्रमाद्वचनादानगमनविसर्गानंदांश्चंद्राच्युतच
शब्दस्पर्शरूपरसगंधानग्नींद्रोपेंद्रयमप्रजापतिभिः क्रमान्नियंत्रितेन
वागादींद्रियपंचके

ख
वे॰सा॰
११

तुर्युंजःशब्दैः क्रमान्नियंत्रितेन मनोबुद्ध्यहंकारचित्ताख्येनां रंगा
तरिंद्रियचतुष्केण क्रमात्संकल्पनिश्चयाहंकारचैत्यांश्च स
र्वानेतान् स्थूलशरीरविषयाननुभवतः॥ जागरणस्थानो बहि
:प्रज्ञ इत्यादिश्रुतेः॥ अत्राप्यनयोः स्थूलव्यष्टिसमष्ट्योस्त
दुपहितविश्ववैश्वानरयोश्च वनवृक्षवत्तदवच्छिन्नाका
शवच्च जलाशयजलवत्तद्गतप्रतिबिंबाकाशवच्च पूर्ववद
भेदः॥ एवं पंचीकृतभूतेभ्यः स्थूलप्रपंचोत्पत्तिः॥ एतेषां
स्थूलसूक्ष्मकारणप्रपंचानामपि समष्टिरेको महान्प्र ११
पंचो भवति॥ यथावांतरवनानां समष्टिरेकं महद्वनं यथा

शया
वांतरजलानां समष्टिरेको महान् जलाशयः॥ एवं तदुपहितं
विश्व वैश्वानरादीश्वरपर्यंतं चैतन्यमवांतरवनावच्छिन्नाकाशवद
वांतरजलाशयगतप्रतिबिंबाकाशवच्चैकमेव॥ आभ्यां म
हाप्रपंचतदुपहितचैतन्याभ्यां तप्तायःपिंडवदविविक्तं सदनुप
हितं चैतन्यं सर्वं खल्विदं ब्रह्मेति वाक्यस्य वाच्यं॥ विविक्तं स
ल्लक्ष्यमपि भवति॥ एवं वस्तुन्यवस्त्वारोपः सामान्येन — प्रद
र्शितः॥ इदानीं प्रत्यगात्मनि इदमिदमयमयमारोपयंती।
ति विशेषत उच्यते॥ अतिप्राकृतस्त्वात्मा वै पुत्र इत्यादिश्रु
तेः॥ स्वस्मिन्निव स्वपुत्रेपि प्रेमदर्शनात् पुत्रे पुष्टे नष्टे वाहमे

वे.सा. वत्पुष्टेनष्टेप्यनुभवदर्शनात्पुत्रआत्मेतिवदति॥चार्वा
१२ कस्तु॥सवाएषपुरुषोन्नरसमयइत्यादिश्रुतेः॥प्रदीप्तगृ
हात्स्वपुत्रंपरित्यज्यापिस्वस्यनिर्गमदर्शनात्॥स्थूलोहंकृ
शोहमित्याद्यनुभवदर्शनाच्चस्थूलशरीरमात्मेतिवदति॥
इयम् अपरश्चार्वाकस्तेहप्राणाःप्रजापतिंपितरमेत्योचुरि
त्यादिश्रुतेः॥इंद्रियाणामभावेशरीरचलनाभावात्काणो
हंबधिरोहमित्याद्यनुभवाच्चइंद्रियाण्यात्मेतिवदति॥अप
रश्चार्वाकोऽन्योऽतरआत्माप्राणमयइत्यादिश्रुतेः॥प्राणाभा १२
वेइंद्रियादिचलनाभावात्॥अहमशनायावानहंपिपासा

वानित्याद्यनुभवाच्चप्राणआत्मेतिवदति॥अन्यस्तुचार्वाको
नो २ ऽन्योंतरआत्मामनोमयइत्यादिश्रुतेः॥मनसिसुप्तेप्राणादेरभावादहं द
संकल्पवानित्याद्यनुभवाच्चमनआत्मेतिवदति॥बौद्धस्तुअ
न्योंतरआत्माविज्ञानमयइत्यादिश्रुतेः॥कर्तुरभावेकरणस्य
शक्त्यभावादहंकर्त्ताभोक्ताइत्याद्यनुभवाच्चबुद्धिरात्मेतिवद
ति॥प्राभाकरतार्किकावन्योंतरआत्माआनंदमयइत्यादिश्रु
तेः॥बुद्ध्यादिनामज्ञानेलयदर्शनात्॥अहमज्ञोऽहमज्ञानीत्या
द्यनुभवाच्चाज्ञानमात्मेतिवदतः॥भाट्टस्तु॥प्रज्ञानघनएवानं
दमयइत्यादिश्रुतेः॥सुषुप्तौप्रकाशाप्रकाशसद्भावादहम।

वे॰सा॰ १३

ज्ञोऽहमहं न जानामीत्याद्यनुभवाच्चाज्ञानोपहितं चैतन्यमा
त्मेति वदति॥ अपरो बौद्धोऽसदेवेदमग्र आसीदित्यादिश्रुतेः॥
सुषुप्तौ सर्वाभावादहं सुषुप्तौ नासमित्युत्थितस्य स्वाभावपरामर्श
विषयानुभवाच्च शून्यमात्मेति वदति॥ एतेषां पुत्रादिशून्यप
र्यंतानामनात्मत्वमुच्यते॥ एतैरपि प्राकृतवादिभिरुक्तेषु श्रु
नु तियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानां
णां उत्तरोत्तरश्रुतियुक्त्यनुभवाभासैर्बाधदर्शनात्पुत्रादीना
मनात्मत्वं स्पष्टमेव॥ किंच॥ प्रत्यगस्थूलोऽचक्षुरप्राणोऽम १३
नाऽकर्त्ता चैतन्यं चिन्मा॥त्रं सदित्यादिप्रबलश्रुतिविरोधा

अनस्त ४

दस्य पुत्रादिशून्यपर्यंतस्य जडस्य चैतन्यभास्यत्वेन घटादिवद
नात्मत्वात्॥ अहं ब्रह्मेति विद्वदनुभवप्राबल्याच्च॥ तत्तत्श्रुति
युक्त्यनुभवाभासानां बाधितत्वादपि पुत्रादिशून्यपर्यंतमखि
लमनात्मैव॥ अतस्तद्भासकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्य
क्चैतन्यमेवात्मतत्वमिति वेदांतविद्वदनुभवः॥ एवमध्यारोपः॥
अपवादो नाम रज्जुविवर्त्तस्य सर्पस्य रज्जुमात्रत्ववत् वस्तुविव
र्त्तस्यावस्तुनोऽज्ञानादेः प्रपंचस्य वस्तुमात्रत्वं॥ तथाहि॥ एतद्भो
स्थुल गायतनं चतुर्विधशरीरजातं भोग्यरूपान्नपानादिकमेतदाश्रयभू पा
तभूरादिचतुर्दशभुवनानि॥ एतदाश्रयभूतं ब्रह्मांडं चैतत्सर्वं

मेतेषांकारणभूतपंचीकृतभूतमात्रंभवति॥एतानिशब्दादि
विषयसहितानिपंचीकृतभूतजातानिसूक्ष्मशरीरभूतजा॰
तमेतत्सर्वमेतेषांकारणरूपापंचीकृतमात्रंभवति॥एतानि
सत्वादिगुणसहितान्यपंचीकृतान्युत्पत्तिव्युत्क्रमेणैतत्कारण
भूताज्ञानोपहितंचैतन्यमात्रंभवति॥एतदज्ञानमज्ञानोपहि
तंचैतन्यंचेश्वरादिकमेतदाधारभूतानुपहितचैतन्यंतुरीय
ब्रह्ममात्रंभवति॥आभ्यामध्यारोपापवादाभ्यांतत्त्वंपदार्थशो
धनमपिसिद्धंभवति॥तथाहि॥अज्ञानादिसमष्टिरेतदुपहितस
र्वज्ञत्वादिविशिष्टंचैतन्यमेतदनुपहितंचैतत्त्रयंतप्तायःपिं

डवदेकत्वेनावभासमानंतत्पदवाच्यार्थः॥एतदुपाध्युपहि॰
ताधारंभूतमनुपहितचैतन्यंतत्पदलक्ष्यार्थोभवति॥अज्ञानादि
व्यष्टिरेतदुपहिताल्पज्ञत्वादिविशिष्टंचैतन्यमेतदनुपहितंचै
तत्त्रयंतप्तायःपिंडवदेकत्वेनावभासमानंत्वंपदवाच्यार्थो॰
भवति॥एतदुपाध्युपहिताधारभूतमनुपहितंप्रत्यगानंद
तुरीयंचैतन्यंत्वंपदलक्ष्यार्थोभवति॥अथवाक्यार्थोवर्ण्य
ते॥इदंतत्त्वमस्यादिवाक्यंसंबंधत्रयेणाखंडार्थबोधकंभव
ति॥संबंधत्रयनामपदयोःसामानाधिकरण्यं॥पदार्थयोःवि
शेषणविशेष्यभावः॥प्रत्यगात्मलक्षणयोर्लक्ष्यलक्षणभा॰

वे.सा.
१५

वक्येति॥ तदुक्तं॥ सामानाधिकरण्यं च विशेषणविशेष्यता॥ ल
क्ष्यलक्षणसंबंधः पदार्थप्रत्यगात्मनामिति॥ सामानाधिकर
ण्यसंबंधस्तावद्यथा सोयं देवदत्त इति वाक्ये तत्कालविशिष्ट
देवदत्तवाचकसशब्दस्यैतत्कालविशिष्टदेवदत्तवाचकायं
शब्दस्यैवैकस्मिन्पिंडे तात्पर्यसंबंधः॥ तथा च तत्त्वमसिइ
तिवाक्येपि परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्यापरो
क्षत्वादिविशिष्टचैतन्यवाचकत्वंपदस्यैवैकस्मिन्चैतन्ये
तात्पर्यसंबंधः॥ विशेषणविशेष्यभावसंबंधस्तु यथा तत्रै १५
व वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायंशब्दार्थैत

वि
त्कालविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्त्तकतया विशेषणविशे
ष्यभावः॥ तथात्रापि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचै ष्य भाव
तन्यस्य त्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभे
दव्यावर्त्तकतया विशेषणविशेष्यभावः॥ लक्ष्यलक्षणसंबं बं
धस्तु यथा तत्र सशब्दायंशब्दयोस्तदर्थयोर्वा विरुद्धतत्का
लैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सह ल
क्ष्यलक्षणभावः॥ तथात्रापि तत्त्वंपदयोस्तदर्थयोर्वा वि
रुद्धपरोक्षत्वादिविशिष्टत्वपरित्यागेनाविरुद्धचैतन्येन स
ह लक्ष्यलक्षणभावः॥ इयमेव भागलक्षणेत्युच्यते॥ अस्मि

वे॰सा॰
१९

न्वा क्येनीलोत्पलमितिवाक्यवत्॥ वाक्यार्थेन संगच्छते॥॥
तत्र तु नीलपदार्थस्य नीलगुणस्य उत्पलपदार्थस्य उत्पल
द्रव्यस्य शौक्ल्यपटादिभेदव्यावर्तकतयान्योन्यं विशेषणवि
शेष्यभावसंसर्गस्य अन्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य
वा वाक्यार्थत्वांगीकारे प्रमाणांतरविरोधाभावात् वाक्यार्थः संग
त्वा च्छते॥ अत्र तु तदर्थपरोक्षत्वादिविशिष्टत्वमर्थापरोप — — चैतन्यस
क्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया वि
शेषणविशेष्यभावसंसर्गस्य अन्यतरस्य तदैक्यविशिष्ट १९
स्य अन्यतरवाक्यार्थत्वांगीकारे प्रत्यक्षत्वादिप्रमाणविरो॰

विशिष्ट २ स्यान्यतर

धाद्वाक्यार्थेन संगच्छते॥ अत्र तु॥ गंगायां घोषो वसतिवाक्य
वत्॥ जहल्लक्षणा न संगच्छते॥ अत्र गंगाघोषयोराधाराधेय
वल्लक्षणस्य वाक्यार्थस्याशेषतो विरुद्धत्वात्॥ वाक्यार्थम
शेषं परित्यज्य तत्संबंधिनी तीरलक्षणा यायुक्ता जहल्ल
क्षणा संगच्छते॥ अत्र तु परोक्षापरोक्षविशिष्टचैतन्यैकत्वं
लक्षणस्य वाक्यार्थस्य भागमात्रे विरोधात्॥ भागांतरमपि
परित्यज्यान्यलक्षणाया अयुक्तत्वात् जहल्लक्षणा न संगच्छ
ते॥ न च गंगापदं स्वार्थपरित्यागेन यथा तीरपदार्थं लक्षय
ति। तथा तत्पदं त्वंपदं स्वार्थपरित्यागेन त्वंपदार्थं तत्पदार्थं

वालक्षयितु अतः कुतोजहल्लक्षणा न संगछत इति वाच्यं॥
तत्र तीरपदाश्रवणेन तदर्थाप्रतीतौ लक्षणया तत्प्रतीत्यपे
क्षायामपि तत्त्वंपदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्ष
णया पुनरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावात्
॥ अत्र शोणो धावतीतिवाक्यवदजहल्लक्षणापि न संभ
वति॥ तत्र शोणगुणगमनलक्षणस्य वाक्यार्थस्य विरुद्ध
त्वात्तदपरित्यागेन तदाश्रयाश्वादिलक्षणया तद्विरोध
परिहारसंभवादजहल्लक्षणा संभवति॥ अत्र तु परोक्ष॰
त्वाऽपरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य

विरुद्धत्वात्तदपरित्यागेन तत्संबंधिनो यस्य कस्यचिदर्थस्य
लक्षितत्वेपि तद्विरोधापरिहारादजहल्लक्षणापि न संभवत्ये
व॥ न च तत्पदं त्वंपदं वा स्वार्थविरुद्धांशपरित्यागेनांशां॰
तरसहितं त्वंपदार्थं तत्पदार्थं वा लक्षयतु अतः कथं प्रका॰
रांतरेण भागलक्षणांगीकरणमिति वाच्यं एकेन पदेन स्वार्थां
शपदार्थांतरोभयलक्षणाया असंभवात्॥ पदांतरेण तदर्थ
स्त प्रतीतौ लक्षणया पुनस्तत्प्रतीत्यपेक्षाभावात्॥ तस्माद्यथा सो अ
यं देवदत्त इति वाक्यं तदर्थो वा तत्कालैतत्कालविशिष्टदे
वदत्तलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धतत्कालैत॰

त्कालविशिष्टत्वांशंपरित्यज्य अविरुद्धदेवदत्तांशमात्रंयथा
लक्षयति॥तथातत्वमसीतिवाक्यंतदर्थौवापरोक्षत्वादिवि
शिष्टचैतन्यैकत्वलक्षणस्यवाक्यार्थस्यांशे विरोधाद्विरुद्धप
रोक्षत्वापरोक्षत्वादिविशिष्टांशंपरित्यज्य अविरुद्धमखंडचै
तन्यमात्रंलक्षयतीति॥अथाधुनाहंब्रह्मास्मीत्यनुभववा
क्यार्थोवर्ण्यते॥एवमाचार्येणाध्यारोपापवादपुरःसरं
तत्वंपदार्थौशोधयित्वावाक्यतोखंडार्थत्वबोधितेऽधि
कारिणोहंनित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानंदा १८
नंताद्वयंब्रह्मास्मीत्यखंडाकाराकारिताचित्तवृत्तिरु

सहितास
देति॥सातुचित्प्रतिबिंबवैतीप्रत्यगभिन्नंअज्ञातंपरंब्र
ह्मविषयीकृत्यतद्गताज्ञानमेवबाधते॥यथापटकारणं
तंतुदाहेपटदाहवत्॥अखिलकार्यकारणेऽज्ञानेबाधि
तेसतितत्कार्यस्याखिलबाधितत्वात्॥तदंतर्भूताखंडा
काराकारिताचित्तवृत्तिरपिबाधिताभवति॥तत्रप्रति
बिंबितंचैतन्यमपिबाधितंयथाप्रदीपप्रभाऽदित्यप्रभा
वभासनासमर्थासतीतयाभिभूताभवति॥तथास्व
यंप्रकाशमानप्रत्यगभिन्नपरंब्रह्मावभासनानर्हतया
तेनाभिभूतंसत्स्वोपाधिभूताखंडार्थवृत्तेर्बाधितत्वाद्

र्पणाभावेमुखप्रतिबिंबस्यमुखमात्रत्ववत्प्रत्यगभिन्नप
रंब्रह्ममात्रंभवति॥एवंसतिमनसैवानुद्रष्टव्यंयन्मनसा
नमनुतइत्येतयोःश्रुत्योरविरोधः॥वृत्तिव्याप्यत्वांगीकारे
णफलव्याप्यत्वप्रतिषेधप्रतिपादनात्॥तदुक्तं॥फलव्या
प्यत्वमेवास्यशास्त्रकृद्भिर्निवारितं॥ब्रह्मण्यज्ञाननाशाय
वृत्तिव्याप्तिरपेक्षितेति॥स्वयंप्रकाशमानत्वान्नाभासउप
युज्यतइतिच॥जडपदार्थाकाराकारितचित्तवृत्तेर्वि—शे
षोस्ति॥तथाहि॥अयंघटइतिघटाकाराकारितचित्तवृ
त्तिरज्ञातंघटंविषयीकृत्यतद्गताज्ञाननिरसनपुरःसरंस्व

गतचिदाभासेनजडंघटमपिअवभासयतीति॥यथादीपप्र
भामंडलंअंधकारगतंघटपटादिकंविषयीकृत्यतद्गतांधका
रनिरसनपुरःसरंस्वप्रभयातदपिभासयति॥एवंभूतस्वस्वरू
पचैतन्यसाक्षात्कारपर्यंतंश्रवणमनननिदिध्यासनसमाध्य
नुष्टानस्यापेक्षितत्वात्॥तेपिप्रदर्श्यंते॥श्रवणंनामषड्विधलिं
गैरशेषवेदांतानामेकाद्वितीयवस्तुनितात्पर्यावधारणं॥लिं
गानितु उपक्रमोपसंहाराऽवभ्यासोऽपूर्वताफलार्थवादोप
पत्त्याख्यानि॥तत्रप्रकरणप्रतिपाद्यस्यतदाद्यंतयोरुपपाद
नमुपक्रमोपसंहारौ॥यथाछांदोग्येषष्ठप्रपाठकेप्रकरणप्र

वे॰सा॰ तिपाद्यस्याद्वितीयवस्तुनः सदेव सोम्येदमग्र आसीत्॥ ए

२० ते कमेवाद्वितीयं ब्रह्म इत्यादावैतदात्म्यमित्यंते च प्रतिपादनं

॥ प्रकरणप्रतिपाद्यस्य तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्

यासः॥ यथा तत्रैवाद्वितीयवस्तुनो मध्ये तत्त्वमसीति नव

कृत्वः प्रतिपादनं प्रकरणप्रतिपाद्यस्य प्रमाणांतराविषयी

करणमपूर्वत्वं यथा तत्रैवाद्वितीयवस्तुनो मानांतराविष

यीकरणं॥ फलं तु प्रकरणप्रतिपाद्यात्मज्ञानस्य तदनुष्ठा

नस्य वा तत्र तत्र श्रूयमाणं प्रयोजनं॥ यथा तत्राचार्यवान् २०

पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इ

ति द्वितीयवस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनं श्रूयते॥ प्रकर

श्री णप्रतिपाद्यस्य तत्र प्रशंसनमर्थवादः॥ यथा तत्रोत तमादे

शमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञा

तं विज्ञातमित्यद्वितीयवस्तुप्रशंसनं प्रतिपादनं प्रकरणप्र

तिपाद्यार्थसाधने तत्र श्रूयमाणा युक्तिरुपपत्तिः॥ तत्र यथा

सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं वि

कारो नामधेयं मृत्तिकेत्येव सत्यमित्यादावद्वितीयवस्तुसा

ते धने विकारस्य वाचारंभणमात्रे युक्तिः श्रूयते॥ मननं तु श्रु

तस्याद्वितीयवस्तुनो वेदांतानुगुणयुक्तिभिरनवरतमनुचिं

वे॰सा॰ २१ तनं॥विजातीयदेहादिप्रत्ययरहिताऽद्वितीयवस्तुनः सजाती
यप्रत्ययप्रवाहो निदध्यासनं॥समाधिर्द्विविधः॥सविकल्पो नि
र्विकल्पश्चेति॥तत्र सविकल्पो नाम ज्ञातृज्ञानादिविकल्पभेद
लयापेक्षयाऽद्वितीयवस्तुनि तदाकारकारितायाश्चित्तवृत्तेर
वस्थानं यथा मृन्मयगजादिभानेपि मृद्भानवत् द्वैतभानेप्य प
द्वैतवस्तु भासते॥तदुक्तमद्वितीये॥दृशिस्वरूपं गगनोपमं
परं सकृद्विभातं त्वजमेकमक्षयं॥अलेपकं सर्वगतं यदद्व
यं तदेव चाहं सततं विमुक्तः॥ॐ॥निर्विकल्पकस्तु ज्ञातृज्ञा २१
नादिविकल्पलयानपेक्षयाऽद्वितीयवस्तुनि तदाकाराकारि
शुद्धोहमानंदमविक्रियात्मको नमेऽस्ति कश्चिद्विषमस्वभावतः॥पुरस्तिरश्चोर्ध्व
मधश्च सर्वतः संपूर्णभूमा त्वजआत्मनि स्थितः॥२॥

तायाश्चित्तवृत्तेरतितरामेकीभावेनावस्थानं॥तदा तु जलाका
राकारितलवणानवभासेन जलमात्रावभासवत्॥अद्विती
यवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमे
वावभासते॥ततश्चास्य सुषुप्तेश्चाभेदशंका न संभवति॥उभय
त्र वृत्त्यभाने समानेपि तत्सद्भावमात्रेणानयोर्भेदोपपत्तेः॥अ सद्भाव
स्यांगानि यमनियमासनप्राणायामप्रत्याहारध्यानधारणा
समाधयः॥तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः॥शौ
चसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः॥करचरणादि
संस्थानविशेषलक्षणानि पद्मकस्वस्तिकाद्यासनानि॥रेचक

पूरककुंभकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः॥ इंद्रिया
णांस्वस्वविषयेभ्यः प्रत्याहरणंप्रत्याहारः॥ अद्वितीयवस्तुन्यं
तरिंद्रियधारणंधारणा॥ तत्राद्वितीयवस्तुनिविछिद्यविछि
द्यांतरिंद्रियवृत्तिप्रवाहोध्यानं॥ समाधिस्तूक्तः॥ सविकल्पक लक्षण
एवअस्यनिर्विकल्पस्यांगिनोलय — विक्षेपकषायरसास्वाद
लक्षणाश्चत्वारोविघ्नाः संभवंति॥ लयस्तावदखंडवस्त्वनवा
लंबेनचित्तवृत्तेर्निद्रा॥ अखंडवस्त्वनवलंबनेनचित्तवृत्तेर
न्यावलंबनंविक्षेपः॥ लयविक्षेपाभावेपिचित्तवृत्ते रागादि २२
वासनयास्तब्धीभावादखंडवस्त्वनवलंबनंकषायः॥ अखं

डवस्त्ववलंबनेनापिचित्तवृत्तेः सविकल्पकानंदास्वादनं
रसास्वादः॥ समाध्यारंभसमयेसविकल्पानंदास्वादनंवा॥
अनेनविघ्नचतुष्टयेनविरहितंनिर्वातदीपवदचलंसत्। चित्तं
अखंडचैतन्यमात्रमवतिष्ठते॥ यदातदानिर्विकल्पसमाधि दा
रित्युच्यते॥ तदुक्तं॥ लयेसंबोधयेच्चित्तंविक्षिप्तंशमयेत्पुन
ः॥ सकषायंविजानीयात्समप्राप्तंनचालयेत्॥ नास्वादये
द्रसंतत्रनिःसंगः प्रज्ञयाभवेदिति॥ यथादीपोनिवातस्थोनें
गतेसोपमास्मृतेति॥ अथजीवन्मुक्तलक्षणमुच्यते॥ जीव
न्मुक्तोनामस्वस्वरूपाखंडब्रह्मज्ञानेनतदज्ञानबाधनद्वारा

शरीरेणां ५ यथेंद्रजालमिति ज्ञानवान्तदिंद्रजालं पश्यन्नपि परमार्थ मिदमिति न पश्यति र

वे॰ स॰ २३ स्वस्वरूपाखंडब्रह्मणि साक्षात्कृते अज्ञानतत्कार्यसंचितकर्मसं
शयविपर्ययादीनामपि बाधितत्वादखिलबंधरहितो ब्रह्मनि
ष्ठः॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः॥ क्षीयंते चास्य क
र्माणि तस्मिन्दृष्टे परावरे इति श्रुतेः॥ अयं तु व्युत्थानसम
ये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेणांध्यमांद्यादिभा न
जनेनांतःकरणेन च पूर्वपूर्ववासनया क्रियमाणानि कर्मा
णि भुज्यमानानि ज्ञानाविरुद्धारब्धफलानि च पश्यन्नपि बा
धितत्वात्॥ परमार्थतो न पश्यन्नपि परमार्थमिदमिति न प २३
श्यति॥ सचक्षुरचक्षुरिव सकर्णोऽकर्ण इत्यादिश्रुतेः॥ उक्तं
ग्ध्यापटुत्वादिभाजनेनेंद्रियग्रामेणाशनायापिपासाशोकमोहादि ५

चा॥ सुषुप्तवज्जाग्रति यो न पश्यति द्वयं च पश्यन्नपि चाद्वयं त
तः॥ तथापि कुर्वन्नपि निष्क्रियश्च यः स आत्मविन्नान्य इती
ह निश्चयः॥ अस्य ज्ञानात्पूर्वं विद्यमानानामेवाहारविहा
रादीनामनुवृत्तिवत्॥ शुभवासनानामेवानुवृत्तिर्भवतीति शुना ५
शुभाशुभयोरौदासिन्यं वा॥ तदुक्तं॥ बुद्धाद्वैतसतत्वस्य यथे तस्य ५
ना ष्टाचरणं यदि॥ शुनां तत्वदृशां चैव को भेदोऽशुचिभक्षणे इति॥ १६
उ ब्रह्मवित्वं तथा मुक्त्वा स आत्मज्ञो न चेतर इति॥ इदानीममा
ज्ञान नित्वादीनि साधनानि तान्येव ज्ञानोत्तरं गुणाः॥ तदुक्तं॥ उत्प
न्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः॥ अयत्नतो भवंत्यस्य न
न्वद्वेष्टृत्वादयः स[illegible]द्गुणाश्चालंकारवदनुवर्त्तंते॥

वे॰सा॰
२४

त्तुसाधनरूपिणाइति॥ किंबहुनायंदेहयात्रामात्रार्थमिछा
निछापरेछाप्रापितानिसुखदुःखलक्षणानि॥ आरब्धफला
न्यानुभवन्नंतःकरणाभासादीनामवभासकःसन्नंतदवसा भा
नेप्रत्यगानंदपरब्रह्मणिप्राणेलीने॥ सत्यज्ञानतत्कार्यसं
स्काराणामपिविनाशात्परमकैवल्यमानंदैकरसम
खिलभेदप्रतिभासरहितमखंडब्रह्मावतिष्ठते॥ नतस्यप्रा
णानुक्रामंत्यत्रैवसमलीयंते॥ विमुक्तश्चविमुच्यतइतिश्रुते २४
ः॥ यज्ञात्मकंयज्ञमिहयज्ञवेदोवदंतिब्रह्मेतिवेदविदःसु
रूपंचंसंख्या॥ ईशंशरीरमपरमतिरिंद्रियाणिप्राणंचसूक्ष्म

वे॰सा॰
२५

मितिमेस्त्वगतिःसमर्वः॥ ॥इतिश्रीमत्परमहंसपरिव्रा
जकाचार्यश्रीअद्वैतानंदभगवत्पादशिष्यसदानंदकृतोवेदां
तसारःसमाप्तिमगमत्॥ ❀ ॥संवत्१८५९रावर्षेमासो
त्तमासेकार्त्तिकमासेशुक्लपक्षेपंचम्यांरविवारे॥ भट्ट
माशंकरस्वहस्तेनलिखितं॥ ❀ ॥शुभंभवतु॥ ❀ ॥
यादृशंपुस्तकंदृष्ट्वा॥ तादृशंलिखितंमया॥ यदिशुद्धमशुद्धं म
वा॥ ममदोषोनदीयते॥ १॥ अदृष्टदोषान्मतिविभ्रमाद्वा
यत्किंचिदूनंलिखितंमयेयं॥ तदर्थमार्यैःपरिशोधनीयंको २५
पन्नकुर्यात्खलुलेखकस्य॥ २॥ ॥ ॥कल्याणमस्तु॥ ॥

वेदांतसारपत्र२५